# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा – प्रथमपत्रिका

दिनाङ्कः- 28-08-2022 पूर्वाह्णः १०.०० तः १.०० पर्यन्तम्

समयः- होरात्रयम् अङ्काः - १००

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. अष्टानाम् एकवाक्येन उत्तरं लिखत । **8**

१. श्रीअभिनवशङ्कराः काः सम्पदः वितर इति प्रार्थयन्ति ?
२. श्रीनीलकण्ठदीक्षितस्य माता का ?
३. प्रभाकरवर्धनस्य द्वितीयः सुतः कः ?
४. “राजपुत्रीं त्वं स्वीकुरु” इति कः अवोचत् ?
५. शुकनासः कम् उपदिदेश ?
६. मतिमान् कस्य उन्नतिं समुपेक्षेत ?
७. विक्रमस्य रथस्य केतनः कः ?
८. ‘कालिदासीयनाटककथामञ्जरी’ केन रचितम् ?
९. खगाधिपः कः ?
१०.कुशः कस्य अन्तेवासी ?

**2.** षण्णां वाक्यद्वयेन उत्तरं लिखत । **12**

१. कः सरस्वत्याः वरपुत्रः? तस्य प्रबन्धौ कौ ?
२. सिद्धः कथमासीत् ?
३. स्थाण्वीश्वरः जनपदः कविना कथं वर्णितमस्ति ?
४. जीमूतवाहनः कः? सः किं कर्तुम् इच्छति ?
५. भीष्मेण काः, कुतः आनीताः ? तासां नामानि कानि ?
६. रामः लवं कथं वर्णयति ?
७. श्रीगुरवः कानि दातुं शारदाम्बां प्रार्थयन्ति ?
८. गन्धर्वराजः कः ? सः कुतः सेनाम् आनाययत् ?

**3.** त्रयाणां पञ्चषैः वाक्यैः उत्तरं लिखत । **9**

१. यशोवती का ? सा कथमासीत् ?
२. भीष्मपरशुरामयुद्धे का ननर्त ? कुतः ?
३. लक्ष्मीः कान् कान् परिहरति ?
४. शिशुकलहमाकर्ण्य के के समागताः ?
५. पुष्पभूतिः कथं भूतं भैरवाचार्यं वाटिकायां ददर्श ?

4. त्रयाणां सप्रसङ्गं विवरणं कुरुत । 9

१. "अनुजग्राह कुलं कुटुम्बिनाम्"।

२. "स्वार्थालसाः परोपकारदक्षाश्च प्रकृतयो भवन्ति भव्यानाम्"।

३. "प्रायेण परोत्कर्षासहिष्णवः हि लोकः"।

४. "न तितिक्षासममस्ति साधनम्"।

५. "दिष्ट्या सिद्धमभिवाञ्छितम् उपनतेन रक्तांशुकयुगलेन"।

5. पद्यद्वयं पूर्णं लिखत । 6

१. विद्यामुद्राक्षमाला ---------------------------मह्यम्॥

२. सच्चिद्रूपात्मनो --------------------------- मह्यम्॥

३. सहसा -------------------------------- सम्पदः॥

6. एकस्य पद्यस्य सान्वयं अर्थं लिखत । 4

१. दृशमस्य तृणीकृतामरां गिरमज्ञातपरानुवर्तनाम्।
स्थितमीप्सितगन्धदुर्विधं परिपश्यन् नृपतिः विसिष्मिये ॥

२. अहो प्रासादिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविः दैवीं वाचं व्यवीवृतत्॥

7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत । 4

१. भारविः २. कालिदासः

8. चतुर्णां रूपाणि परिचाययत । 4

१. आगामिन्याम् २. मुदितमनाः ३. लभावहे

४. असुभिः ५. मादृशाः ६. नाम्ना

9. चत्वारि पदानि वाक्ये योजयत । 4

१. रहः २. यज्वा ३. भवान्

४. सन्तमसेन ५. लस्तकः ६. दूरेत्यः

10. चतुर्णां पर्याय पदानि लिखत । 4

१. आढ्यः २. परिव्राट् ३. अभ्भः

४. आशीविषः ५. कुसुमशरः ६. दरी

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 6

१. अत्यद्भुतमेतत्   २. इदमपि   ३. अप्यकार्यं

४. हेतुरहेतुः   ५. रत्नावली   ६. उभावपि

12. चतुर्णाम् एकं पदं लिखत । 4

१. अन्तर्धानमगमत्   २. परीक्षितुम् इच्छा   ३. दुःखेन अवाप्तुं योग्या

४. सुरराट् वाहनम्   ५. पञ्चमो वेदः   ६. कमलजदयिता

13. चतुर्णां व्याकरणविशेषं लिखत । 8

१. वाङ्मनसे   २. दार्षदः   ३. अलमस्मै

४. उपतिष्ठते   ५. वात्या   ६. नमः सदसे

14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

१. देहदार्ढ्यम्   २. वाक्सवित्रि   ३. विपदन्ताः

४. वाक्पाणिपादम्   ५. यथामति   ६. राजर्षिः

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत। 6

१. जगाम   २. सिषेवे   ३. अमन्यत

४. आस्ताम्   ५. वर्तेत   ६. लभताम्

16. चतुर्णां रिक्तस्थानानि पूरयत। 4

१. अपि रक्ष्यते ------------निक्षेपः ?

२. खगाधिपस्य हृदयं --------कृतम्।

३. शममुपयातु ममापि --------------।

४. विनिपातोऽपि समः ----------- ।

५. भूषणभट्टस्य जनकः -----------।

----------------------